दीर्घत्वेन सिद्धमिति भाष्यासंगत्यापत्तेः । एतदोषुपसर्जने एतत्सूत्रं तस्मै दित्तात्ह्रस्वपरिणामप्रवृत्तेः स्त्रीकारात । नत्वं नपुंसके ऽमितत्वाति
तात्पर्यं । द्वितीयादिग्रहणस्यैवमप्यचारितार्थ्यादितिवाच्यं । श्राद्धधातुके इत्येतत्सान्ह्रस्वपत्तास्यापि द्वितीयादिविवयेपूर्वमेवप्रवृत्ते
स्थानपात । एतत्सर्वं भाष्यवचनाल्लिक्षयते इत्याद्येकदेशमुक्त्या ध्वनितं । स्वमोर्लुकीति । तद्विषयेन लुमतेति निषेधवाधेनचारितार्थ्येनबहिरं
गलुग्विषयतया ह्रस्वमानामिति भावः । वस्तुत एतत्सर्वमत्रत्यके यदनुरोधेन । तकारोच्चारणसामर्थ्येन नपुंसकलुकीवात्रापि सामर्थ्या
देवेनप्रवृत्तेः । न च बाहिरंगत्वं लुग्विषये वहिरंगपरिभाषाप्रवृत्तेरत एव एनदत्वे एनत् श्रितक इतिनासिध्यति । एनच्छ्रितक इति आम्नाति
तिभाष्यसंगच्छते । एनोद्विधानेनैतत्सूत्रविषये नलुमतेत्यस्याप्रवृत्तिरिति तत्प्राप्यः । एषा मनाभिधानमेव । अस्यानां कार्याय थालक्षणम
प्रयुक्ते इति भाष्योक्तेः । विभेदसमृध्या मानाभावत्वेनेनतो पृथक् ग्वक्तव्योऽत्याहुः । अचः पर इति । नपुंसकस्येति सूत्रे अग्रहणसामर्थ्यैन
दृत्सा चह्रस्वस्य शालित्वनोधनत्वं । अन्यथाद्ग्रंतानामिकोचीत्ये वसिध्याद्न्तेपुनपुंसकह्रस्वेतेन चाकारग्रहणमेवकुर्यात । आवृत्तौ
मानंचघाडिनायन सूत्रे हिरण्मयानीतिनिर्देशएववः कांडस्तंक्षीत्यादौ ह्रस्वजातेरवः पर्त्वाऽज्वत्वेवनुम । उक्तं शब्दाद्भुतत्वेनेति भावस्त
दाहः । स्वमोर्मिति । एते नपुंत्सादयो नपुंसके शौ नपुंसकस्येति पुजेरिति नुनदपस्यमित्सपात्तद् युजेऽसमासेत्यस्यानित्यत्वात्पूर्वं प्रवृत्तौ अचः प

रूप्ते लोभावेन नपुंसकस्येत्यस्याप्राप्तेः। वस्तुतस्तु उञ्जादेः क्विपि नपुंसकेनुमविषयेऽनभिधानमेव। वार्त्तिकानुरोधात्। अन्यथा भाष्यवार्त्ति
कयोः फलभेदापत्तेरित्याहुः। आतोरिति। दीधीवेवीटामिति सूत्रेन पठन्तीति तस्यैव भाष्यके पाठो इत्यर्थः। संकलनयेति। तत्कृतं पंचवो
धनं। चतुर्दशेति। पूजार्थानां त्रयाणां त्रयश्छिन्ना तस्मानानानुनासिकविकल्पाच्च। चतुर्विंशतिरिति। भाग्वार्त्तिवल्लि विसर्गादित्वात् विस
ल.भा.न. ४ मानु ६६ र्गेनुनासिकः। अप्रग्रहेति पर्युदासेनाक्षरसमाम्नायिकेष्वेव तन्त्रवृत्तेः। उभयोरिति। षकारच्छिन्नलपः श्रवणस्य नेन। भाष्यमतेरिति क्रम
तद्वृति। भाष्यमतेन्वः पठत्ये शालित्यर्थेन अकृतेच पाक्षलजातेभावान्नमो प्राप्तेः। एवं च तान्यस्मा धृत्स्यैवेति भावः। उपपत्त्यभावादिति।
निपमेमानाभावादिति भावः। आमादिकमिति। शास्त्रेणेवासिद्धेरिति भावः॥ ॥इति हलन्ता नपुंसकलिंगाः॥ इत्यादिभिरिति।
आदिनात्र तस्यैव तद्दहम्। इत्येकइति। अत्राहान्चवीजं तु किमेत्तिङ् इति विहितस्य तद्धितश्चेत्यनेनासिद्धिः। कोसम्बवादिति वि
हितात्यास्याम इत्यत्वेन लुक् सिध्यात् स्यतत्वे फलाभाव इति। अनुपसर्गत्वादिति। अवदत्तं वेत्यादि भाष्ये लकाराकारेणान्युण
भूतोपसर्गत्ववाधो वोध्यत इति भावः। पद्मीति। स्वतादीनुपक्रम्यातोदत्ता पठन्ते इति काशिकायां। आमादिकमिति। स्वइस्त विप्रा.ज. ६६
रोस्त्वतिताविति कृ[redacted]सूत्रेण स्वाितत्वात्सनाञ्चहोतानव्यः। तिः पुरुषिदश्विनेत्यादेस्सनात्तिरसोरं तोदात्तपाठाच्च। निर्गु
णत्वाच्चेति। आद्युदात्तप्रापके शास्त्राभावादिति भावः। तिकृन्तादिति। प्रत्ययेन पगभावइति भावः। अनग्रहणमिति। मेज

ष्यं कृतो निर्दोषगणान्तरं तलाभेसिद्धइत्यादि।लक्षणेति।कचिद्वर्णग्रहणे पिततस्याभाषाप्रवृत्तिज्ञापकं चतएनित्यत्वमात्र
ज्ञापकमितिभावः।भूतमिपमिति।भूतशब्दःपौतन्यवृत्तिर्नित्यनपुंसकस्तत्रपर्जन्यवल्लक्षणप्रवृत्यातदंगत्वाभुक्तेनानोन्तासन्निधानो
त्तरं णापिलक्ष्यलक्षणस्यैतिन्यायेननपुनर्ङीबित्तिभावः॥ ॥त्त्यमयानि।अनुपसर्जनाधिकारेणचेति।तस्यहिबहुकुरुचराव्याप्
त्या।एवंचवनोरश्चेत्येत्रवाज्ञापितं तद्विधाविति भावः।जातित्वानपायादिति।ऋन्तादिविधौसंज्ञापदेनरूढिर्वगम्यतेनतुएवप्रवृत्तिनि
मित्तकत्वरूपंसैन्नालंगम्यते।अतएवप्रःसंज्ञायामित्यादिनाआख्यादिसिद्धिरितिदिक्।गौणीवृत्तिरिति।लाक्षणिकत्वापरपर्यायंगौण
त्वमित्यभिमानेनेदं।सह्शलाक्षणिकत्वमप्रसिद्धत्वमेववागौणत्वं।गौणमुख्यन्यायश्चेपदकार्यविषय इतिसिद्धन्तेनुजातौ स्यावश्यक
मितिबोध्यं।जात्यतो इति।आलराजामुख्यजातिकन्यायामुत्पन्नेआभीरजातावित्यर्थः।न्यायाच्छूद्राणामुत्पन्नोऽग्रजातिकन्यायां ननुशूद्रत्वं त
न्नास्ति।अतएवशूद्रसधर्माणस्तेइत्येवस्मृतिप्रयुक्तंनतुशूद्रा इति।शूद्रत एवेति।अतस्तद्याप्त्यर्थंनेदमितिभावः।भाष्यवार्तिकादौतुशूद्र क
जातिवृत्तिमूलत्वेनताजातितत्वारोप्यशूद्रशब्दप्रयोगइति।शूद्रशब्दार्थसमवेतस्त्रीत्वस्यसत्वादस्त्येवटापःप्राप्तिरित्यमहत्पूर्वेतिशूद्रश
ब्दार्थसमवेतेस्त्रीत्वेपिशूद्रशब्दादेवटापस्यान्नतुतदंतादितितदंतविधिज्ञापकतापिभाष्योक्तानासंगता।अतएवशूद्रविमात्रजात्या
त्येवोक्षआनत्वक्षत्रियवेश्याःक्षात्रियावेश्याशूद्रासमुत्पन्नाःक्षत्रियवेश्यशूद्रास्त्वेवोक्ताः तत्रजातिरित्यस्याभावेपूर्वंजातिमात्रविव
क्षयाकुक्कुटाण्डवत्शूद्रशब्देनसमासेततःस्त्रीत्वविवक्षायामहत्पूर्वेतिनिषेधेनटाबस्या इतिमन्यतेइत्यन्यत्रविस्तरः।मुत्यादिन

CC-0. In Public Domain. Digitization by eGangotri

लन्द्रार
२०

श्नोति। न्यासकृतेति शेषः। इदं तु स्पाष्टमप्रामाणिकं। अत्वस्य भाष्यासंगतेः। एधातेः क्रनिविति। घुमास्थेतीत्वं। पावानइत्यस्य वनिवासिद्धिमा
श्रित्य इत्वमवकाशप्राप्तावित्यस्य तंत्रेव भाष्ये प्रत्याख्यानात्। स्थः क चेति सूत्रभाष्यस्थेवंस्या इत्यत्रावावेति सूत्रभाष्यस्थे सर्वेष्टेः इत्यत्र चरुपाभिजिनेस्स
तो वा ग्रहणं मंडूकप्लुत्यानुवर्त्य व्यवस्थितविभाषाश्रयणात्तदभावः। तत्र विजेवेत्यन्ये। अत एव धीर्ध्मापते दिगतेर्वेति ध्यायतेः संप्रसारणमिति वा
र्तिकस्य भाष्यं संगच्छते। घुमास्थेत्यत्र हली त्यस्यानजादावित्यर्थात् प्रत्ययलक्षणसूत्रस्य नियमार्थत्वेपि प्रत्ययलक्षणं सुलभमिति दिक्। नि
वेवीनोति। वेनो नहस्तादीतवार्तिकविहितविशेषणस्येदमेव फलमिति भावः। नत्वतादिति। अतो प्रमाणमेतदिति भावः। आख्यानामिति।
उपदेशा इति तु वक्तव्यमिति वदतो वार्तिककारस्येति भावः। आनुमानुकोपीति एरुरित्यनेन नतेलोरनुमानादिति भाष्यः। इत आकरे इति। अ
ना सावितीनं त्वप्रदूर्वनालधर्मइति तदाश्रयविधौ नानालविजित्वमिति सिद्धान्ति। एवं वान्यतरस्याग्रहणं किमर्थमिति भावः। ङीचेति
अन्नेभ्य इति विहितेन अनो यो सौ विकल्प इति अन्यतरस्यामिति विभक्तसूत्रेण प्राप्त इत्यर्थः। अन इति सूत्रेपि अन्यतरस्यामित्यस्य
सत्वात् विकल्पनियमलाभोन्यथासति त्यार्थे विधिरेवस्यादिति भावः। सउपधेति। सउपधालोपिनोनुपसर्जनस्य बहुव्रीहेरेवेत्यर्थः।
निषेधार्थमिति योगविभागेन पक्षप्राप्तस्य अन्नेभ्य इति ङीप इत्यर्थः। इत्येव ङीविति। नियमशास्त्राणां निषेधमुखेन प्रवृत्तिरित्यभि
मानेने दंतेनेति। अन उपधेत्यस्य नियमेनेत्यर्थः। अन्नेभ्य इति। अस्यान्यथेत्यादिः अन उपधेत्यस्य विधायकत्वे इति तदर्थः। प्रकरणा
त्तरस्थे नेति। तेनाननलरत्वं बाधितं गौरवादिति। ममतु। अन्नेभ्य इति प्राप्तङीपमनूपत्त्व सान्नियोगेन रभावमात्रं विधायकं त्विति

ईश्वः
२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

8059

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्लीच्छितं येन तस्मै पाणिनये नमः ॥ ५९ ॥ त्रिनयनमुखनिःसृतामिमां य इह पठेत्प्रयतश्च

पा॰शि॰ ॥६॥ सदा द्विजः ॥ स भवति धनधान्यपशुकीर्त्तिमाननुलं च सुखं समश्नुते दिवीति दिवीति ॥ ६०

॥ १२ ॥ ॥ अथ शिक्षा ॥ ५ ॥ मात्मा बुध्या ॥ ५ ॥ दान्तस्था ॥ ५ ॥ हकारं ॥ ५ ॥ स्वराणां ॥ ५ ॥

यथा सौराष्ट्रिको ॥ ५ ॥ वं वर्णाः ॥ ५ ॥ प्रातः पठेत् ॥ ५ ॥ छन्दःपादौ ॥ ५ ॥ त्वग्निः सोमः ॥ ५ ॥

सुतीर्थादागतम् ॥ ५ ॥ शङ्करे ॥ ५ ॥ द्वादश ॥ ५ ॥ ६० ॥ ॥ इति पाणिनीयशिक्षा समाप्ता ॥ ॥ रामः ॥

॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पा॰ शि॰ क्षरं हतायुष्यं विस्वरं व्याधिपीडितम्॥ अक्षताशस्त्ररूपेण वज्रं पतति मस्तके॥ ५३॥ हस्तही
५ नन्तु यो धीते स्वरवर्णविवर्जितम्॥ ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति॥ ५४॥ ह
स्तेन वेदं यो धीते स्वरवर्णार्थसंयुतम्॥ ऋग्यजुःसामभिःपूतो ब्रह्मलोके महीयते॥ ५५॥
॥ ११॥ शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते॥ वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति
स्थितिः॥ ५६॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात्॥ कृत्स्नं व्याकरणं प्रोक्तं तस्मै
पाणिनये नमः॥ ५७॥ येन धौता गिरः पुंसां विमलैः शब्दवारिभिः॥ तमश्चाज्ञानजं भि रामः
न्नं तस्मै पाणिनये नमः॥ ५८॥ अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया॥ चक्षुरु ५

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्युर्बृहस्पतिरिन्द्राबृहस्पती॥ अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं वी
यं नीचस्वरितम्॥४६॥ हविषां मध्योदात्तं स्युरिति स्वरितम्॥ बृहस्पतिरित्युदात्तम् इन्द्राबृह
स्पती इति सुदात्तम्॥४७॥ अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः॥ स्वरितः कर्णमूलीयः
सर्वस्ये प्रचयः स्मृतः॥४८॥ चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः॥ शिखी रौति त्रिमात्रं
तु नकुलस्त्वर्धमात्रकम्॥४९॥ कुतीर्थादागतं दग्धमपवर्णं च भक्षितम्॥ न तस्य पाठे मो
क्षोऽस्ति पापाहेरिव किल्बिषात्॥५०॥१०॥ सुतीर्थादागतं व्यक्तं स्वाम्नायं सुव्यवस्थित
म्॥ सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते॥५१॥ मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयु
क्तो न तमर्थमाह॥ स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥५२॥ अन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पा॰ शि॰ ॥४॥

निनायेनेदंख्यापितंभुवि॥४०॥ छन्दः पादौतुवेदस्यहस्तौकल्पोथपठ्यते॥ ज्योतिषाम
यनंचक्षुर्निरुक्तंश्रोत्रमुच्यते॥४१॥शिक्षाघ्राणंतुवेदस्यमुखंव्याकरणंस्मृतम्॥तस्मा
त्साङ्गमधीत्यैवब्रह्मलोकेमहीयते॥४२॥उदात्तमाख्यातिवृषोऽङ्गुलीनांप्रदेशिनीमू
लनिविष्टमूर्द्धा॥उपान्तमध्येस्वरितंधृतंचकनिष्ठिकायामनुदात्तमेव॥४३॥उ
दात्तंप्रदेशिनींविद्यात्प्रचयंमध्यतोऽङ्गुलीम्॥निहतंतुकनिष्ठिक्यांस्वरितोपकनि
ष्ठिकाम्॥४४॥अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तंनीचस्वरितम्॥मध्योदात्तं
स्वरितंद्व्युदात्तंत्र्युदात्तमितिनवपदशय्या॥४५॥९॥अग्निःसोमःप्रवोवीर्यंहविषां स्मः ४

CC-0. In Public Domain. Digitization by eGangotri

त्र

पाठदोषं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् ॥ निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न
नु सानुनास्यम् ॥ ३५ ॥ ७ ॥ प्रातःपठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन ॥ मध्यंदिने क
ण्ठगतेनचैव चक्राह्वसंकूजितसन्निभेन ॥ ३६ ॥ तारन्तु विद्यात्सवनं तृतीयं शिरोगतं तच्च

सांब सदाप्रयोज्यम् ॥ मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥ ३७ ॥ अचो
ऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलःस्मृताः ॥ शेषाःस्पृष्टा हलःप्रोक्ता निबोधानुप्रदा
नतः ॥ ३८ ॥ यमोनुनासिका न ह्रौ नादिनो हझषःस्मृताः ॥ ईषन्नादा यणो जश्च श्वासि
नस्तु खफादयः ॥ ३९ ॥ ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते ॥ दाक्षीपुत्र पाणि

श्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पा· शि·

३

र्द्धमात्रस्तु मूर्द्धनि॥ नासिकायां तथार्द्धं च रङ्गस्यैवं द्विमात्रता॥ २८॥ हृदयादुत्करे तिष्ठन्कांस्ये
नसमनुस्वरन्॥ मार्द्दवं च द्विमात्रं च जघन्वाँ इति निदर्शनम्॥ २९॥ मध्ये तु कंपयेत्कंपमुभौ पा
र्श्वौ समौ भवेत्॥ सरङ्गं कम्पयेत्कंपं रथीवेति निदर्शनम्॥ ३०॥ छ॥ एवं वर्णाः प्रयोक्तव्या
नाव्यक्ता न च पीडिताः॥ सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते॥ ३१॥ गीती शीघ्री शिरः
यथा कम्पी तथा लिखितपाठकः॥ अनर्थज्ञोल्पकण्ठश्च षडेते पाठकाधमाः॥ ३२॥ माधुर्यम
क्षरव्यक्तिः पदच्छेदस्तु सुस्वरः॥ धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥ ३३॥ शङ्कितं भी
तमुद्घुष्टमव्यक्तमनुनासिकम्॥ काकस्वरं शीर्षगतं तथा स्थानविवर्जितम्॥ ३४॥ उ

राम:

ष्टं तं करणं स्मृतम् ॥ तेभ्योपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ २१ ॥ अनुस्वारयमानां च नासिका
स्थानमुच्यते ॥ अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥ २२ ॥ अलाबुवीणानिर्घोषो दन्त
उग: मूल्यः स्वराननु ॥ अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः श्रायसेषु च ॥ २३ ॥ अनुस्वारे विवृत्त्यान्तु विरामे
चाक्षरद्वये ॥ द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रोकारवकारयोः ॥ २४ ॥ व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां
न च पीडयेत् ॥ भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥ २५ ॥ ५ ॥ यथा सौराष्ठिका नारीत
कौँ इत्यभिभाषते ॥ एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥ २६ ॥ रङ्गवर्णं प्रयुञ्जीरन्नोग्र
सेत्पूर्वमक्षरम् ॥ दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत् ॥ २७ ॥ हृदये चैकमात्रस्तु अर

CC-0. In Public Domain. Digitization by eGangotri

औ

पा॰शि॰ ॥२॥ मुकारादिपरंपदम्॥ स्वरान्तंतादृशंविद्याद्यदन्यव्यक्तमूष्मणः॥१५॥३॥ हकारस्यच्चैमैर्यु
क्तमन्तस्थाभिश्चसंयुतम्॥ उरस्यन्तंविजानीयात्कण्ठमाहुरसंयुतम्॥१६॥ कण्ठ्या
वहाविचुयशास्तालव्या ओष्ठजावुपू॥ स्युर्मूर्धन्याऋटुरषादन्त्या लृतुलसाः स्मृताः
॥१७॥ जिह्वामूलेतुकुःप्रोक्तोदन्त्योष्ठ्योवःस्मृतोबुधैः॥ एऐतुकण्ठतालव्यावो
औकण्ठोष्ठजौस्मृतौ॥१८॥ अर्द्धमात्रातुकण्ठ्यस्यादेकारैकारयोर्भवेत्॥ ओका
रौकारयोर्मात्रातयोर्विवृतसंवृतम्॥१९॥ संवृतंमात्रिकंज्ञेयंविवृतन्तुद्विमात्रिक
म्॥ घोषावासंवृताःसर्वेअघोषाविवृताःस्मृताः॥२०॥४॥ स्वराणामूष्मणांचैववि रामः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैष्टुभानुगम् ॥ तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ ८ ॥ सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मा
रुतः ॥ वर्णाञ्जनयते तेषां विभागः पंचधा स्मृतः ॥ ९ ॥ स्वरतः कालतः स्थानात्प्रयत्नानुप्रदा
नतः ॥ इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥ १० ॥ उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः
॥ ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥ ११ ॥ उदात्ते निषादगान्धारावनुदात्त ऋषभ
धैवतौ ॥ स्वरितप्रभवा ह्येते षड्जमध्यमपंचमाः ॥ १२ ॥ अष्टौ स्थानानि वर्णानामुरः कंठः
शिरस्तथा ॥ जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥ १३ ॥ ओभावश्च विवृत्तिश्च श
षसा रेफ एव च ॥ जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १४ ॥ यद्योभावप्रसंधान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सम्भवतो

पा॰ शि॰ ॥

॥१॥ श्रीपाणिनयेनमः॥ ॥अथशिक्षांप्रवक्ष्यामिपाणिनीयंमतंयथा॥शास्त्रानुपूर्वंतद्विद्याद्यथोक्तंलोक
वेदयोः॥१॥प्रसिद्धमपिशब्दार्थमविज्ञातमबुद्धिभिः॥पुनर्व्यक्तीकरिष्यामिवाचउच्चारणेविधिम्॥२॥
त्रिषष्टिश्चतुःषष्टिर्वावर्णाःशम्भुमतेमताः॥प्राकृतेसंस्कृतेचापिस्वयंप्रोक्ताःस्वयंभुवा॥३॥स्वराविंश
तिरेकश्चस्पर्शानांपंचविंशतिः॥यादयश्चस्मृताह्यष्टौचत्वारश्चयमाःस्मृताः॥४॥अनुस्वारोविसर्गश्च
श्रेयो ᳲकᳲपौचापिपराश्रितौ॥दुःस्पृष्टश्चापिविज्ञेयोऌकारःप्लुतएवच॥५॥आत्माबुद्ध्यासमेत्यार्थो समेत्यो
न्मनोयुङ्क्तेविवक्षया॥मनःकायाग्निमाहन्तिसप्रेरयतिमारुतम्॥६॥मारुतस्तूरसिचरन्मन्द्रं
जनयतिस्वरम्॥प्रातःसवनयोगन्तंछन्दोगायत्रमाश्रितम्॥७॥कण्ठेमाध्यंदिनयुगंमध्यमं ॥ रामः

॥१॥

श्री

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥पाणिनीयशिक्षा॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०५०

१ ॥ [illegible]

उत्तरदेशा संयोगाउकूल क्षपा रा उ कूलं आपायोनी वाहितोर्थः [illegible]

श्रीः साधुविभक्तिविंता · साधूनां विभक्तिविभागः स्तस्य विना चेत् यदि क्रियेत तदा सा व्यक्तिः प्रथमाभिधेया · साधूना
मग्रगराघइत्यर्थः · या व्यक्तिः स्वौजसं · स्वतेजसां विलासैः वहु अनामपदं नमनं नामः न विद्यते नामो येषां ते अनामाः
शत्रवः इत्यर्थः तेषां पदं स्थानं तावत्साकल्येन साधयितुं क्षमा स्यात् - समर्था स्यात् · १
तात् · क्षमा नाम पदं साधयितुं वहुः स्यात् · एकापि व्यक्तिर्वहुः सैन्याधपेक्षा नास्तीत्यर्थः · २ विभक्तिविना साधुं
यथा स्यात्तथा चेत् यदि क्रियेत · तदा सा व्यक्तिः प्रथमाभिधेया · प्रथमेत्यभिधेयं नाम यस्याः सा · चिन्त्यतां · या व्यक्तिः
स्वौजसां विलासैः विसर्गलोपलुक्क्रमैः वहुनामपदं प्रातिपदिकप्रकृतिकसुवन्तं साधयितुं क्षमा समर्था स्यात् · ३

[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रीगणेशाय नमः॥ ॥प्रातिपदिकार्थेति। प्रातिपदिकार्थनियतोपस्थितिकत्वं तद्धर्मे प्रथमा भवति। यस्मि
न्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमोपस्थितिः स प्रातिपदिकार्थः। द्रोणेति। द्रोणो भिन्नपरिमाणनिष्ठप
रिच्छेदकतानिरूपितपरिच्छेद्यतावान् व्रीहिः। सम्बोधनेति। स्वाभिप्रेतार्थबोधजनको व्यापारः। कारकेति।
उत्तरसंज्ञैकवाक्यतापन्नतया वाक्यार्थबोधजनकसमर्थाधिकारत्वं। कर्तुरीप्सिततममिति। कर्तृनि
ष्ठव्यापारकरणकफलसंबंधप्रकारककर्तृनिष्ठेच्छानिरूपितोद्देश्यतावच्छेदकक्रियान्वयितत्कारकं भ
वति। तत्कारकं कर्मसंज्ञं स्यात्। कर्तुः किमिति। यादृशक्रियायामन्वयस्तत्कारकस्य स्वफलसंबंधो
ऽपेक्ष्यः एतदर्थकं कर्तुरिति। माषेष्वश्वमिति। गतिप्रतिबंधानुकूलव्यापारो बंधधात्वर्थः। मा
षेषु प्रसक्तमभक्ष्यसम्पग बध्नातीत्यर्थः। पयसौदनमिति। गलबिलाधःसंयोगानुकूलव्या १
पारो भुजेरर्थः। ईप्सिततम ओदनः न तु पयः। हरिः सेव्यते। प्रीत्यनुकूलव्यापारो भजेरर्थः।
ती

श्रतेनेति। परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्त्यनुकूलो दानव्यापारे क्रियः। तत्र करणं शतं। स्वस्वत्वोत्पत्तिफलाश्रयत्वा
द्विप्रादिः कर्म तस्य तत्क्रियतेनोक्तत्वात्। प्रथमा। प्राप्तोनन्द इति। संबंधानुकूलव्यापारः प्राप्तिः। तदाश्रयत्वादानं
दः कर्ता। संबंधाश्रयत्वात्पुरुषः कर्म। तस्य प्राप्तानंदेयमित्यर्थकसमासेनउक्तत्वात् प्रथमा। अस्माभ्र
तमिति। योग्यतानुकूलव्यापारः तदनुकूलव्यापाराश्रयत्वाद्देवदत्तः कर्ता। योग्यताश्रयत्वाद्वृक्षः क
र्मतस्य च उप्यते एतदर्थकसंपन्नमिति निपातेन। [illegible]भिहितत्वात्प्रथमा। तत्राद्य के ति। [illegible]। नाम्न धातूपा
ते व्यापारजन्यफलेन संबध्यमानीप्सितं कारकं कर्मसंज्ञं भवति। ग्रामं गच्छन् तृणं स्पृशतीति। संयो
गानुकूलव्यापारः स्पृशेरर्थः। संयोगरूपफलाश्रयत्वात्तृणं कर्म। विषं भुंक्ते। गलविलाधः संयोगा
नुकूलव्यापारो भुजेरर्थः। गलविलाधः संयोगाश्रयत्वाद्विषं कर्म। इत्यादीनामिति। गां दोग्धि पयः।
अन्तःस्थितद्रवद्रव्यविभागानुकूलो व्यापारो दुहेरर्थः। विभागावधित्वाद्गौरपादानत्वं। अपादान

लेर्नविवक्षायां अनेन कर्मत्वं। तस्मात् द्वितीया। तदर्थः स्ववृत्तिवधितानिरूपकत्वं। तथा च गोवृत्तिवधितानिरूपक
त्वं। तथा च गोवृत्तिवधितानिरूपकगवाभिन्नकर्मनिष्ठविभागानुकूलव्यापारः कर्तृनिष्ठ इति बोधः॥ बद
लिमिति। परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्त्यनुकूलो भस्यं देहीतिशब्दप्रयोगरूपो याचेरर्थः। वसुधा
रूपकर्मणिकारकस्य अपादानत्वादिनाविवक्षितस्य बलेः कर्मसंज्ञायां द्वितीया तदर्थो निरूपि
तत्वं। तस्य स्वत्वनिवृत्तिरूपत्रस्वत्वे अन्वयः॥ वसुधायाः स्वत्वोत्पत्ताव् अन्वय इति दिक्। अविनीतमिति।
अहं त्वं भवद्वश्यं करिष्यामीति शब्दप्रयोगेन कर्तृज्ञानांगीकारानुकूलो याचेरर्थः। ज्ञानविषयत्वाद्वि गज ४
नयः कर्म। तदुपकारकं अविनीतः तस्याधिकरणत्वेनविवक्षायां अनेन कर्मसंज्ञायां द्विती रूपा ४
या। तदर्थस्तन्निष्ठत्वं। विनीतनिष्ठविनयाभिन्नकर्मविषयांगीकारानुकूलो व्यापारः। कर्तृ
निष्ठ इति बोधः॥ तंडुलानिति। निष्पत्त्यनुकूलो व्यापारः पचेरर्थः॥ निष्पत्त्याश्रयत्वाद्धो ह्नं कर्म २

CC-0. In Public Domain. Digitization by eGangotri

तद्युक्तकारकं तंडुलः। तस्य कर्मसंज्ञायां द्वितीया। तदर्थः स्ववृत्तिविक्लृतिजन्यत्वं तस्य विक्लित्तौ अन्वयः। गामिति।
परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्त्यनुकूलः शासनरूपो व्यापारो दुहेरर्थः। इतरांशे द्वितीया विना तुल्यं। व्रज
न मवरुणद्धीति। निर्गमनप्रतिबंधानुकूलो व्यापारो रुधेरर्थः। निर्गमनप्रतिबंधपूर्वकफलाश्रयत्वाद्गौः कर्म॥
तद्युक्तकारकं व्रजः तस्याधिकरणत्वेनाविवक्षायां अनेन कर्मत्वं। द्वितीयार्थः। तन्निष्ठत्वं च तस्य नि
र्गमप्रतिबंधे अन्वयः। माणवकमिति। जिज्ञासाविषयार्थज्ञानानुकूलः पंचाद्युतिशब्दप्रयोगो
य व्यापारः पृच्छेरर्थः। विषयतासंबंधेन ज्ञानाश्रयत्वात्पंथाः कर्मेति द्विषयज्ञानवत्वसंबंधेन तद्युक्ता
रकं माणवकः तस्य कर्मत्वात् द्वितीया। तदर्थः तत्कर्तृकोपदेशजन्यत्वं माणवककर्तृकउपदेश
जन्यपथ्यभिन्नकर्मविषयकज्ञानौकः पंचाद्युतिशब्दप्रयोगरूपो व्यापारः कर्तृनिष्ठद्युतिबो
धः। वृक्षमवचिनोतीति। विभागपूर्वकग्रहणं चिनोतेरर्थः। माणवकं धर्मं ब्रूते इति। ज्ञान

तंकूल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क

जनकशब्दप्रयोगरूपो व्यापारो वृत्त्यर्थः। मालवकसंबंधिधर्मविषयकज्ञानजनकशब्दप्रयोगरूपो व्यापारः

कर्तृनिष्ठ इति बोधः। माणवकं धर्मं शास्ती ति। प्रवृत्तिपर्यवसायी सत्स्वार्थः शास्तेः। माणवकसंबंधि

ज्ञानजनक धर्मभिन्नः कर्मविषयकशासनरूपो व्यापारः कर्तृनिष्ठ इति बोधः। ग्रामं जयति देवदत्तमिति। स्वस्व

लोपस्यानुकूलो व्यापारो जयतेरर्थः। ग्रामभिन्नकर्मनिष्ठस्वस्वत्वलोपस्यानुकूलो देवदत्तसंबंधिपरस्वा जा

नुकूलो व्यापारः कर्तृनिष्ठ इति बोधः। सुधां क्षीरनिधिमिति। अंतःस्थितसारद्रव्यनिर्गमनानुकूलो व्यापा

रो मंथेरर्थः। क्षीरनिधिसंबंधिसुधाभिन्नकर्मनिष्ठनिर्गमनानुकूलो व्यापारः कर्तृनिष्ठ इति

बोधः। देवदत्तं शतं मुष्णाति। परस्वत्वनिवृत्त्यनुकूलः तदज्ञाने देशसंयोगानुकूलो मुषेरर्थः। प्रा

तस्य संयोगेऽन्वयः। देवदत्तस्य स्वत्वनिवृत्तौ परत्र स्वत्वे अन्वयः। अजां ग्रामं नयति हरति कर्षति उ

वहति। स्वेति कर्मत्वेन परत्र देशांतरसंयोगानुकूलो व्यापारः स्कंधग्रहणपूर्वकं बलात्कारस्य

उत्तरदेशसंयोगानुकूलव्यापारानुकूलो [illegible] जातो रर्थः

CC-0. In Public Domain. Digitization by eGangotri

वैकेस्यांतरकर्मरास्त्वेकोव्यापारः॥ नयतिवहतिहरतिकर्षतीनामर्थः॥ अकर्मकधातुभिरिति॥ कुरून्स्वपि
तीति। शयनानुकूलो व्यापारः स्वपेरर्थः॥ स्थित्यनुकूलव्यापारोऽस्तेरर्थः॥ गतिः॥ नतिः॥ आसिरस्त्यक
र्तृअणिकर्ता। णिपदेनतादृशंगृह्यते। तद्भिन्नं चगत्याद्यर्थकाद्येवगृह्यते तेन तन्निरूपितत्वंचास्या
र्थः॥ तथा च स्वघटितभिन्नोत्तरदेशसंयोगानुकूलव्यापारज्ञानानुकूल व्यापारगलबिलाधःसंयोगा
नुकूलव्यापारार्थकशब्दवृत्तिकर्मसंज्ञानिरूपकार्थबोधकनिरूपितकर्तृत्ववान्यः सगतिबु
द्धीनांसोचप्रत्ययार्थः स्वाश्रयानुकूलत्वाविच्छेसातिस्वविशिष्टत्वं। तथा च गतिबुद्ध्याद्यर्थानुकूलव्यापा
रमात्रमेवगृह्यते। तादृशपरार्थतभिन्नत्वंचगत्यादिकमेव। तथा च गत्याद्यर्थानुकूलव्यापारमा
त्रिलवत्सोकर्मसंज्ञकइतिसूत्रार्थः॥ एतस्तत्र कर्तुरितिस्वभस्यकास्कन्दस्यरयंतग
त्याद्यर्थकाभिन्नधातुगम्यक्रियान्वयिरूपविशेष्यार्थपरत्वगमकं। एवं दशेतिगत्तिकिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गतिबुद्धिप्रत्यवसानार्थपदस्य धातुभिन्नज्ञानविशेषार्थभिन्नगतिबुद्धिप्रत्यवसानार्थकारूपविशे
षार्थकरूपत्वेगमकं। अत्रच प्रकृते अकर्मकरूपेण देशकालेगंतव्ये भिन्नप्रवृत्तिकर्मसंज्ञा
निरूपकार्थबोधकमेवग्रह्यते इति ज्ञाप्यते। अकर्मकपदस्य अर्थ स्यात्॥ ह्रकोः। भक्ष्यशोहरसांच ह — गतिबुद्धीति सूत्रे
धातोरर्थः। उत्पत्तकूलो व्यापारो इकार भक्ष धातोरर्थः। हरणार्थ उत्पत्त्योभिले हृतः। अ
भिनिविशश्च। अभितव रूपे विपरीतोच्चारणांस धातविवक्षायां तेन तत्रैव कर्मसंज्ञेत्यर्थः।
अभ्यन्तरार्थस्मिन। भक्तिः भक्ति विरोधी उभयोर्यस्येत्यर्थः। अभ्यन्तरार्थ भिन्नस्येत्यर्थे अधिव
सतिवैकुंठमिति न सिध्यति। उभसर्वतसोः। उभसर्वयोस्तसो। पञ्चम्यर्थे विहितत्वं उभसर्व
विहिततस्यंतयोगे यदीयभागाद्यर्थकलमः उभसर्वतसोः ततो षष्ठ्यर्थः संबंधः दर्शयसं
बंधवदुभयभागसर्वभागवृत्तिनो गोपादूरस्यर्थः। एवं धिकशब्दयोगे र्थसंबंधितता ४

CC-0. In Public Domain. Digitization by eGangotri

द्वितीया। एवं सर्वत्र उपर्यादीनां समीपो धर्म्येदृशसमीपाधोदेशवृत्तित्वं आमादृर्थः। लोकनिरूपितसामीप्यवद्देशवृत्ति
त्वात् हरिरिति बोध्यः। अभितः परितः समया उभयतः सर्वत्रेत्यर्थः। समया निकषा शब्दौ सामीप्यार्थकौ।
हा शब्दः शोके। अंतरांतरेण। परस्परसाहचर्यादिरूपस्य संज्ञाका चेव। अंतरा त्वां मां हरिः मध्यदेशवृत्ति
त्वं अंतराशब्दार्थः। तत्र मध्यत्वं यन्निरूपितं तद्वाचका द्वितीया। तदर्थः। निरूपितत्वं तस्य मध्यते
ऽन्वयः। तन्निरूपितत्वम् तन्निरूपितत्ववन्मध्यदेशवृत्तित्ववान् हरिरिति बोधः। अंतरेण हरिं न सुखं।
अभावप्रयोज्यत्वं अंतरेणोऽर्थः। नस्याभावस्य वाचका द्वितीया। तदर्थः प्रतियोगित्वं। हरि
शब्दः हरिभक्तिपरः हरिभक्तिनिष्ठप्रतियोगितानिरूपकाभावप्रयोज्यत्ववान् सुखाभाव इति बोधः। क
र्मप्रवचनीयाः। महासंज्ञाकरणं तत्वेदुच्चारितेत्योऽर्थः। अन्वीयतेतस्यैव संज्ञायाः आस्यादिति।

ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्मप्रोक्तंवंतइतिव्युत्पत्त्या भूतकालिकक्रियाविशेषव्यंजकपदांतरवाच्यकर्मत्वेवंप्रकारबोधजनकः। अर्थात् विधमा
नकालीनक्रियाविशेष्यकपदांतरवाच्यत्वधर्मत्वप्रकारबोधजनकइतिलभ्यते। भूतक्रियाकालीनक्रिया
निरूपदांतरवाच्यधर्मबोधकवर्तमानकालिकक्रियाधर्मबोधकइतिपर्यवसितोर्थः। तस्यसंज्ञानां
तादृशपदस्याहारंविनानुपपन्नत्वं इतिपदंसर्वत्रकर्मप्रवचनीयसंज्ञाविधायकेऽध्याह्रियतइतिभावः। कर्म
प्रवचनीयेनद्वितीयेतिवाक्येयुक्तग्रहणांकर्मप्रवचनीयश्चोक्तसंबंधनिरूपकार्थबोधकत्वरूपसंबं
धेसतिप्रातिपदिकत्वात् द्वितीयेत्यर्थलाभाय। तृतीयार्थे। तृतीयार्थेकेनतन्निमित्तभूतः सहार्थोपलक्ष्ये।
तस्मिन्साहित्येद्योत्येअनुः कर्मप्रवचनीयइत्यर्थः। द्वितीयातदर्थः। नदीमन्विति। नदीनिरूपितसाहि
त्यवत्संबंधवदभिन्नासेनेतिबोधः। हीने। द्वितीयार्थे हीनत्वंहरिनिरूपितहीनत्ववंतः सुराइतिबो ५
धः। स्वरूपत्वात्सर्वेऽपि। लक्षणेत्थम्। लक्षणम्ज्ञापकंज्ञानजनकंज्ञानसाधनाधिकरणेनदृष्टांभ

CC-0. In Public Domain. Digitization by eGangotri

तारमान शब्देन धर्मिविशेष्यकत्वं लिं वि धेर्मप्रकारक ज्ञानस्य साधकार्थकत्वेन ज्ञानजन्यज्ञानविषयत्वजन्यत्व
लिं विकल्पप्रकारक ज्ञान विषयत्वरूपसंबंधो लक्ष्यते। भागशब्देन स्वासमर्थकेन तन्निरूपितस्वत्वसं
वंधो लक्ष्यते। वीप्सा व्याप्यकत्वं। एष विषय भूतेषु स्वघटितवाक्यजन्यबोधविषयेषु प्रतिपर्येन वः क
र्मप्रवचनीयाद् उत्पत्तिः। वृक्षं। ज्ञानजन्यज्ञानविषयत्वरूपसंबंधानिरूपकवृक्षबोधक वृक्षेति प्रातिप
दिकात् द्वितीया। तदर्थः जन्यज्ञानविषयत्वान्विशुद्ध भिन्नकर्तृनिष्ठो विद्योतनरूपो व्यापारः। भक्तो
विष्णु। विष्णुजन्य विष्णुभक्ति प्रकारक ज्ञान विषयत्वं द्वितीया। तदर्थः। जन्यतायां निरूपितसंबंधेनतवि
ष्णावन्वयः। विष्णु निरूपितस्वत्ववती लक्ष्मीरिति बोधः। वृक्षं वृक्षं कर्मभिरी। द्वितीयार्थकर्मताः व्यापारक
त्वं संबंधेन स्वेवनेत्वस्यः द्विवचनात्। कर्मप्रवचनीयसंज्ञाफलं तु उपसर्गत्वाभावः। वृक्षाभिन्नकर्म
निरूपितव्यापकत्वं नतत्संबंधानुकूलव्यापारः कर्तृनिष्ठ इति दीक्षिताः। नव्यास्तु कर्मप्रवचनीययु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्पनेनैव द्वितीया। तद्वैर्व्यापकत्वं तत्र कृत्स्नपर्वस्य निरूपितत्वसंबंधेनान्वयः। वृक्षनिरूपितव्यापकत्ववज्जलसंबंधानुकूल
व्यापारः कर्तृनिष्ठ इति बोधः। संज्ञापूरणं द्वितीयापि न व्या.। अभिरभागे। गेहादि वो अं। संभावनायामिति। उत्कट
कोटिकाशंकास्वकतरकोटिसाधनसंबंधको टिप्यविषयकं ज्ञानं। अन्ववसर्गः कामचारानुज्ञा। गर्हा निन्दा।
समिधोपि स्यात्। लकारार्थः कर्त्ता। संभावनावसर्पिरन्वयविंद्र भिन्नकर्तृत्वेलेभ्यवती कर्तृनिष्ठा संभवि
ना विषयीभूता सन्ताद इति बोधः। अपि स्तुयाद्विष्णुं। कर्तृनिष्ठसंभावनार्थविषयक बोधजनकशब्दप्रयो
गविषयीभूतं विष्णुभिन्नकर्मविषयकः स्तुत्यनुकूलो व्यापारः॥ अपि स्तुहि। कर्तृनिष्ठकामचारानुज्ञावि
षयास्तुत्यनुकूलो व्यापारः। अपि स्तुयात्त्वं। कर्तृनिष्ठ निंदाविषयवृषलाभिन्नकर्मनिष्ठस्तुत्यनुकू
लो व्यापारः। अपि सिंच। अपि स्तुहि। कर्तृनिष्ठ जलाभिन्नकर्मनिष्ठ जलसंबंधानुकूलकर्तृनिष्ठ वि
त्वभिन्नकर्मविषयकस्तुत्यनुकूलो व्यापार इति बोधः। कालो ध्वनोः॥ अत्यंतसंयोगो व्यापकत्वम्।

CC-0. In Public Domain. Digitization by eGangotri

कालाध्वनिरूपितव्यापकत्वे कालाध्ववाचकौ द्वितीयातदर्थे व्यापकत्वे निरूपितत्वसंबंधेन कालाध्वनोरन्वयः। व्या
पकत्वस्याश्रयतासंबंधेनान्वयः। मासं कल्याणी। अत्र कल्याणीपदेन कल्याणाश्रय आत्मपु आगृह्यते। एकत्वमा
न्मासत्वनिरूपितव्यापकत्ववत्कल्याणाश्रय आत्मेति बोधः। मासं गुडधाना इत्यत्राप्येवं। क्रोशं कुटिला नदी इत्यत्र
व्यापकत्ववत्कौटिल्यवद्भिन्ना नदीति बोधः। एवं क्रोशमधीते। इति द्वितीया। साधकतमं। साधयति निष्पाद
यति। तत्साधकं उत्पत्त्यनुकूलव्यापाराश्रयः। उत्पत्तिश्च उपस्थितत्वात् क्रियायाः एव गम्यते। क्रिया धात्वर्थः
फलव्यापारश्च। तत्र फलं गृह्यते। तथा च फलनिष्पादकमित्यर्थः। तच्च फलोत्पत्त्यनुकूलव्यापारोत्पत्त्य
शि व्यवहितप्राक्कालीनत्वरूपः। अयं च व्यापारे बुध्यते। एवं च फलोत्पत्त्यनुकूलफलोत्पत्त्यव्यवहितत्वा
ग्वर्तिव्यापाराश्रयः करणमित्यर्थः। तत्र तत्पदग्रहणाभावेऽपि करणमिति महासंज्ञाबलादेव साधकतमका
रणमित्यर्थलाभे पुनः साधकतमलाभो भविष्यतीत्याशयेन शंकते। तमप्ग्रहणं किमिति। तमपर्थस्य कार

महतासामर्थ्यादेव साधक १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तो तें
कपर्कोरेशब्दः क्लिलमपकर्षेनाश्नीयात्तद्विज्ञाप्यते। स्वर्वस्साधकतमलाभेनस्याद्रिस्तमपत्येहरां। गंगायांघो
षडुति। आधारोधिकरणं भिन्नत्रमहासंज्ञाकरणसामर्थ्याद्धि धारस्याधिकरणसंज्ञालाभेऽपकर्षाधारस्येहरां
१६ सर्वावयवाभेदेनान्वयः आधारस्तौवास्वकस्यतथावतिलेषु तैलंमत्रैवस्यात्। तमपकर्षेहरोनकारकप्रयुक्तागत
प्रकर्षोनास्त्ययाहाधारमात्रस्यसंज्ञासिध्यति। रामेणेति। रामाभिन्नकर्तृनिष्ठव्यापारजन्यवाणाभिन्न
व्यापा। निष्ठकरणाभवाहितोत्पत्तिरूपायाणविग्रोगाश्रयः कर्माभिन्नोवालीतिबोधः। स्वः। अक्षैरिति। कर्मसं
ज्ञाभतद्दिषयकस्यापिकर्मणि द्वितीयेतिभावः। भहास्त्रूपरत्वात्तृतीयेत्याहुः। फलन्तुअक्षैर्दिव्यतेदे कर्मतापाः
वदत्तेनयज्ञाप्तद्रूपत्रअन्नौकर्तृणोकर्मत्वाभावः। अपवर्गेतृतीया। अह्नाक्रोशमिति। सकोनिरूपितव्या द्वे
पकफलमजुस्क्रियारंभाणप्राक्कालीनताल्वानिष्ठव्यापारजन्याभिव्यक्ति आश्रयकर्माभिन्नोऽनुवाकइ ७
तिबोधः। क्रोधेनेत्यत्रैककोशनिरूपितत्वव्यापकत्वेऽप्यतेद्रुतिभावः। स्वहेतुके। सहार्थोन्वयिशब्दे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पस्थितक्रियान्वयित्वे धर्केस्मातिपदिकात्सहितनिरूपितसंबंधे तृतीया स्यात्। पुत्रेणसहागतः पिता। गमनसमानका
लीनगमनाधिकरणगमनत्वरूपसाहित्यार्थः। आधाराधेयभावस्तृतीयार्थः। तस्य प्रथमागमनेन्वयः। अत्र
त्रिकं गमनसमानकालीनगमनाधिकारकगमनवान्गमनकर्त्ता भिन्नः पिताऽभूतिबोधः। सहेनाऽप्रधा
नवृत्तिवक्तमेव कागहरणासामर्थ्यात्सहार्थे न्वयिमात्रमपेक्षितं तेन साकं मोदियोगे पितृतीया भवति।
येनांगविकारः। अंगमस्यप्रत्यंगं। नत्वशब्दउपरियत्त रवयववपरः येनावयवेनावयविनो विकारो ल
क्ष्यते ततस्तृतीया भवतीत्यर्थः। अत्रांगग्रहणाभावेऽवयस्यावयविस्थितत्वाच्च तच्छब्दोऽवयवपरो न स्यात्।
एवं सति कारणत्वेन विकारो लक्ष्यते इति कारणत्वमोपक श्वावदोऽस्ति तृतीया स्यात्। तथा चाक्षिकाण
मस्येत्यत्र प्रधमान स्यात्। ३। कर्मणो यमभिप्रैति। सहार्थयोगे तृतीया कर्मनिरूपितसात्स्य भिन्न
कर्मविषयककर्मसंबंधिप्रकारिकाकर्तृनिष्ठा संप्रदानसंज्ञकइत्यर्थः। विषयगो दहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तीति। स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापारो दाधात्वर्थस्तदुद्देश्यत्वं संप्रदानं। तत्र विप्रस्याभेदेनान्वयः।
तस्य निरूपितत्वसंबंधेन स्वत्वोत्पत्त्येकदेशस्वत्वेऽन्वयः। गवाभिन्नकर्मवृत्तिस्वस्वत्वनिवृत्तिपूर्वकविप्रा
भिन्नसंप्रदाननिष्ठस्वत्वोत्पत्त्यनुकूलो व्यापारः कर्तृनिष्ठ इति बोधः। कर्मणा यमभिप्रैति। क्रियाजन्यफ
लप्रकारकेच्छाभिन्नसंप्रदानकृतित्वेन जनकनिष्ठानुकूलव्यापारः कर्तृनिष्ठ इति बोधः। रुच्यर्थानां
प्रीयमाणः। समवायसंबंधावच्छिन्नप्रीत्यनुकूलो व्यापारो रुच्यर्थः। रुच्यर्थकानां प्रयोगे प्रीय
माणः समवायेन प्रीत्याश्रयः संप्रदानसंज्ञकः स्यादित्यर्थः। हरये रोचते भक्तिः। कर्मसंज्ञाया बाधितत्वात्तेन
संप्रदानत्वं। हर्यभिन्नसंप्रदाननिष्ठसमवायसंबंधावच्छिन्नप्रीत्यनुकूलव्यापारः कर्तृनिष्ठ इति बो
धः। अत्र कर्तृको भिन्नाधारस्त्वविरति। अभिपूर्वकलपधातो विषयतासंबंधावच्छिन्नप्रीत्यनुकू ८
लव्यापारोऽर्थस्तत्कर्त्तरि हरिः। तदन्यद्वितीयाद्विप्रीत्यनुकूलव्यापारो स्वेरर्थः। श्लाघह्नुङ्। ए बांप्र

CC-0. In Public Domain. Digitization by eGangotri

कृ

योगेज्ञीप्स्यमानः ज्ञानानुकूलव्यापारानुकूलव्यापारेच्छाविषयः संप्रदानसंज्ञः स्यात्। गोपी स्मरात् कृष्णाय श्ला-
घते ह्नुते तिष्ठते शपते वा। कथनकर्मणः स्वाभिप्रायज्ञानानुकूलव्यापारानुकूलव्यापारः सपत देशादि करणात्
स्थितिकरणोस्वाभि स्थितिकरणाक स्वापप कथनाकस्वाभिप्रायविषयज्ञानानुकूलव्यापारः श्लाघादीनामर्थः।
कथनकर्मणः स्वाभिप्रायज्ञानानुकूलफलभिन्नसंप्रदानवृत्ति व्यापारानुकूलस्मराभिलहेतुचयोऽप्य
व्यापारे गोप्याभिन्नकर्तृनिष्ठद्युतिबोधः। स्वंसर्वसर्वत्र। धारेरुत्तमर्णः। धारयतेः प्रयोगे उत्तमर्ण उक्तप्र-
तिगृहीता संप्रदानमित्यर्थः। भक्ताय धारयति मोक्षं हरिः। भक्ताभिन्नसंप्रदानसंबंधि मोक्षाभिन्नकर्मकृष्ण-
वस्थितिसनुकूलो व्यापारः कर्तृनिष्ठद्युतिबोधः। स्पृहेः ईप्सितः। स्पृहेः प्रयोगे स्पृहचालर्थफलसंबंधप्रकारकेच्छाविषयः
संप्रदानसंज्ञः स्यादित्यर्थः। पुष्पेभ्यः स्पृहयति। पुष्पमात्रं स्पृहेरर्थः। पुष्पाभिन्नसंप्रदाननिष्ठविषयतानिरूप-
केच्छाकर्तृनिष्ठद्युतिबोधः। प्रकर्षविवक्षायां फलस्य विषयतावात्पस्याप्यलेन विवक्षायां परस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राधेयाप स्थलं पहृत्तयोरेकत्र प्रवृत्तौ परं कार्यमित्यर्थकेन विप्रतिषेधशास्त्रेण परत्वात्कर्मसंज्ञा। क्रुधद्रुहेति। क्री
वधादिजनकान्तःकरणवृत्तिविशेषजन्यं तोष्ठमर्दनादिव्यापारात् द्वेषविषयोत्स्यनुकूलव्यापार उत्कर्ष
विरोधिधर्मारोपव्यापारजनकचित्तवृत्तिविशेषात्मा। विशेष्यक दोषलवप्रकारकज्ञानजनकव्यापार
पकधात्वर्थयोगे तज्जनककोपः। यात्प्रेषु विषयतानिरूपकः संप्रदानसंज्ञक इत्यर्थः। हरये कुध्यति। ह
र्यभिन्नसंप्रदाननिष्ठवधादिजनकव्यापारः कर्तृनिष्ठ इति बोधः। द्रुह्यति। हर्यभिन्नसंप्रदाननिष्ठेद
मंईर्ष्यति। हर्यभिन्नसंप्रदाननिष्ठोत्कर्षः। हरयेऽसूयति। हर्यभिन्नसंप्रदाननिष्ठगुणासूतिबोधः। रा
धीक्ष्योः॥ अनयोर्योगे यत्संबंधिविविधः। प्रश्न8क्रियते तत्संप्रदानमित्यर्थः। कृष्णाय राध्यति। ई
क्षते। शुभाशुभविषयकज्ञानानुकूलव्यापारः। राधीक्ष्योरर्थः। कृष्णाभिन्नसंप्रदाननिष्ठशु
भाशुभविषयकज्ञानानुकूलव्यापारः। गर्गाभिन्नकर्तृनिष्ठ इति बोधः। प्रत्याङ्भ्यां श्रुवः ५। ५९

CC-0. In Public Domain. Digitization by eGangotri

आभ्यांपरस्यश्रृणोतेर्योगेऽस्यपञ्चव्यापारनिरूपितकर्तृत्ववानयःसंप्रदानसंज्ञकस्त्यर्थः। विप्रायगांप्रति
श्रृणोति। आश्रृणोतिवा। प्रवर्त्तनाजन्यस्वत्वप्रकारकाभ्युपगमश्रृणोतेरर्थः। प्रवर्तनायांविप्रस्यान्व
यः। विप्राभिन्नसंप्रदाननिष्ठप्रवर्त्तनाजन्यगवाभिन्नकर्मनिष्ठस्वत्वप्रकारकेच्छाकर्तृनिष्ठेति
बोधः। अनुप्रतिगृणश्च। आभ्यांगृणातिनिरूपितकारकसंबन्धप्रथमव्यापारकर्तृसंप्रदानसं
ज्ञंस्यादित्यर्थः। होत्रेऽनुगृणाति। प्रतिगृणाति। शंसितृनिष्ठप्रोत्साहनविषयकहर्षानुकूलव्यापारोगृणाते
रर्थः। हर्षरूपफलाश्रयत्वात्शंसितुःकर्मत्वात् विशेषत्वात्पूर्वेणसंप्रदानमन्त्वेति। कृतौयायांप्राप्त
यांसंप्रदानसंज्ञेतिकेचित्। होत्रभिन्नसंप्रदानभिन्नशंसितृनिष्ठकर्तृनिष्ठइतिबोधः। परिक्रयणे
संप्रदानं। शतेनेति। शताभिन्नकरणनिष्ठव्यापारप्रवाहितोत्तरोत्पत्तिकाकिंचित्कालिकव्यापार
जन्यस्वत्वोत्पत्त्याश्रयकर्मभिन्नोऽहंवदन्तइतिबोधः। तादर्थ्येचतुर्थी। तादर्थ्यमुपकार्योपकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कभावः संबंधः तत्र चतुर्थी। भक्त्ये हरिं भजति। भक्तिनिष्ठोपकार्यतानिरूपितोपकारकत्वं तत्तादर्थ्यं भिन्नकर्मनि
ष्ठप्रीत्यनुकूलो व्यापारः फलं निष्कृतिबोधः। क्लृपिसंपद्यमाने च। क्लृप्तिस्वरूपसतिरूपांतरस्य प्राप्तिः अर्थो वा प्रका
चतुर्थी। भक्तिर्ज्ञानाय कल्पते। भक्त्युत्पन्नज्ञाननिष्ठकर्तृकोत्पत्तिरितिबोधः। उत्पातेन। ज्ञापिते। प्राग्नीनांशभात्र भस्य
वक्र भूतविकारउत्पातः। तेन ज्ञापितोर्थस्तत्र वर्तमानाच्चतुर्थी। वाताय कपिला विद्युत्। ज्ञातज्ञन्यज्ञान
विषयत्वं चतुर्थ्यर्थः। वातविषयकज्ञानजन्यज्ञानविषयत्ववती कपिलाभिन्ना विद्युदितिबोधः। हितयोगे च। ब्राह्म
णायहितं। [illegible] विषयस्याधनं हितपदार्थः। षष्ठ्यर्थ आधाराधेयभावः। ब्राह्मणनिष्ठो विषयस्य
धनमित्यर्थः। क्रियार्थोपपदस्य। क्रियोपपदस्य क्रियाजनक क्रियावाचकधातोः प्रयोगे फलाद्युपस्थापका
न तुमुन्नंतार्थनिरूपितकर्मत्वगतौ चतुर्थी स्यादिति भावः। फलेभ्यो याति। उपस्थिततुमुन्नंतार्थ हरणं कि
या कर्मणि चतुर्थी। द्वितीयार्थः कर्मत्वं तस्य देशांतरसंयोगेऽन्वयः। तत्र फलव्यापारस्वस्वपर्यकालीनस्त १०
स्यमानकर्तृको वा भयसंबंधेन गमनेऽन्वयः। फल। भिन्नकर्मनिष्ठदेशांतरसंयोगानुकूलो व्यापारः। ७

CC-0. In Public Domain. Digitization by eGangotri

कर्तृनिष्ठ इति बोधः। नमस्कुर्मो नृसिंहाय। नृसिंहाभिन्नकर्मत्वविशिष्टस्य अनुकूलव्यापारपूर्वकालीनव्यापारस्समा
नकर्तृकर्मनारसिंहवृत्त्युत्कृष्टत्वत्तो हमयकृष्ट इति ज्ञानजनको धात्वनुकूलव्यापारः वयंकर्तृकस्तदभिन्नकर्तृनि
ष्ठ इति बोधः। तुमर्थाच्च भाववचनादिति सूत्रेण विहितो यः तुमुन्समानार्थकप्रत्ययस्तदन्ताच्चतुर्थी
इत्यर्थः। स्वपूर्वकालीनस्वफलसमानकर्तृकत्वो भयंनस्तुमर्थः। प्राक्पूर्वकालीनयासमानकर्तृकं
मानं कर्तृनिष्ठ इति बोधः। नमस्वस्तिस्वाहा। एतदर्थान्वयबोधकप्रातिपदिकाच्चतुर्थी। हरये नमः॥
निष्ठत्वं वस्त्वर्थः। तस्य बोधेन्वयः। हरिनिष्ठनमस्त्वमुत्कृष्टः त्वत्तो हमयकृष्ट इति ज्ञानजनको धात्वनु
कूलव्यापारः स्वत्वनिवृत्ति तद् इति बोधः। प्रजाभ्यः स्वस्ति। प्रजासंबंधिमंगलमित्यर्थः। अग्नि। पितृ। सुरुपयवत्। स्वत्वनिवृत्ति
पूर्वकपरस्वत्वोत्पादनानुकूलव्यापारः पितृस्वेच्छस्य परार्थः। निरूपितत्वं वस्त्वर्थः। अग्निनिरू
पितस्वत्वनिवृत्तिपूर्वक अग्निनिरूपितस्वत्वोत्पत्त्यनुकूलव्यापार इति बोधः। एवं सर्वत्रापि गम्यर्थे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति। स्वतन्त्रध्वनीतिपरिसमुअनास्थितमहरांकर्त्तसं। तदर्थमाह। गंत्राधिष्ठित इति। शब्दप्रयोगसमानकालीनगन्त
व्यापारजन्यफलाश्रय इत्यर्थः। उत्तरोत्तरेति। अत्र शब्दप्रयोगकाले यः व्यापारजन्यफलाश्रयत्वाभावान्नानि
षेधः। इति चतुर्थी। ध्रुवमपाये। अपायविषये यत् ध्रुवं तज्जनकव्यापाराश्रयो विभागावधिः स अपादानसंज्ञः
स्यात्। अत्र विभागव्यापाराश्रयोऽश्वसादेः धावत्सस्याप्यस्ति लभ्यते। तथा च प्रकृतधात्वात्तव्यापारानाश्रय
त्वे सति प्रकृतधात्वात्तव्यापाराश्रयो यः स अपादानसंज्ञः। ग्रामादेति। ग्रामो भिन्नापादाननिष्ठाव
धितानिरूपकदेशान्तरसंयोगानुकूलव्यापारः कर्तृनिष्ठ इति बोधः। जुगुप्सेति। अनिष्टसाधकत्वप्र
कारकज्ञानजन्यसम्भागानुकूलो व्यापारः इष्टसाधनवत्त्वविशेष्यकोऽसमानदेशत्वसमानकालत्वाभ्य
संबंधेनाधिकारविशिष्टसाधनत्वाभाववज्ज्ञानं कर्तृनिष्ठ इति बोधः। भीत्रार्थानां। अनिष्टज्ञानानिष्टे ११
परिहारार्थकधातुयोगे निष्ट हेतुरपादानं। चोराद्बिभेति। चौराभिन्नापादाननिष्ठजन्यानिष्टज्ञानं

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तृनिष्ठ इति बोध्यः। चोराद्भायते चोराभिन्नापादाननिष्ठपरिहारः कर्त्तृनिष्ठ इति बोध्यः॥ पराजेः॥ पराजेः प्रयोगेऽसो-
ढ उत्साहाभावविषयोऽर्थः सोपादानमित्यर्थः। अध्ययनात्पराजयते। कस्यास्य ध्रुवस्य कारकस्य ज्ञानप्रयुक्तो-
त्साहाभावे पराजेरर्थः। तद्योगे तद्विषयकोत्साहाभावः सोपादानं। अध्ययनाभिन्नसंप्रदानं। निष्ठनिष्ठ-
प्रतानिरूपककस्य ध्रुवस्य ज्ञानप्रयुक्तोत्साहाभावः कर्त्तृनिष्ठ इति बोध्यः॥ अत्रोत्साहाभावरूपक्रियायाउ-
पस्थितत्वात्तद्बलयिकारकस्यैवापादानसंज्ञा भवति। तेन शत्रून्पराजयते इत्यत्रापादानसंज्ञा भवति। वा-
रणार्थानां। प्रवृत्तिभातकूलव्यापारार्थकधातुप्रयोगे स्वान्वयिक्रियोपस्थापकधातूपस्थाप्यफलसंबं-
धप्रकारकेच्छाविषयः अपादानसंज्ञः स्यादित्यर्थः। यवेभ्यो गां वारयति। यवाभिन्नापादाननिष्ठगलबिला-
धःसंयोगानुकूलव्यापारस्तदनुकूलव्यापाराभावानुकूलव्यापारः कर्त्तृनिष्ठ इति बोध्यः॥ अन्तर्द्धौ येना॥ स्व-
कर्मकदर्शनाभावानुकूलदेशाभिघावस्थितौ सत्यां स्वकर्तृकदर्शनाभावमिच्छति तदपादानम्। मा-
तुर्निलीयते कृष्णः। मात्रभिन्नापादाननिष्ठसकर्मकदर्शनाभावानुकूलदेशाभिघावस्थितिः। कृष्ण।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भीष्मकर्तृनिष्ठेतिबोधः। आख्यातोपयोगे। उपयोगेः ग्रहणारम्भोत्तरकालीननियमपूर्वकस्वीकरणानुकूलो व्यापारः। त
स्मिन्सति आख्यातवक्त्रोऽपादानमित्यर्थः। उपाध्यायादधीते। उपाध्यायाभिन्नापादाननिष्ठोच्चारणोत्तरकालीनस्वी
कारानुकूलव्यापारः कर्तृनिष्ठ इतिबोधः। जनिकर्तुः। जनिरुत्पत्तिः तस्याः आश्रयो जनिकर्त्ता उत्पत्त्याश्रयः तस्य
प्रकृतिर्हेतुरपादानं। ब्राह्मणात् प्रजाः। ब्रह्माभिन्नापादाननिष्ठजन्योत्पत्तिः प्रजाभिन्नकर्तृनिष्ठेतिबोधः। भुवः प्रभ
वः। भूधातुप्रयोगे प्रभवः प्रथमज्ञानहेतुरपादानं स्यादित्यर्थः। हिमवत इति। हिमवदभिन्नापादाननिष्ठजन्यप्रथमज्ञाना य
नुकूलव्यापारः कर्तृनिष्ठ इतिबोधः। यतश्चाध्वकालनिर्माणं। यतोऽवधिभूतात् अध्वनः कालस्य निर्माणं परिच्छेदः क्रिय
ते तद्वाचकात्पञ्चमी। तद्युक्तादध्वनः प्रथमासप्तम्यौ। तद्युक्तात्कालवाचकात्सप्तमीत्यर्थः। वनादिति। पंचम्यर्थो
व्यवहितोत्तरत्वं। प्रथमासप्तम्योरर्थः। व्यवहितोत्तरदेशवृत्तित्वं। वननिरूपितव्यवहितोत्तरत्वेन योजननिरूपिता
व्यवहितोत्तरदेशवृत्तित्ववान् ग्राम इतिबोधः। कार्त्तिक्या इति। पञ्चम्यर्थस्तिथिप्रथमावयवतावयवि १२
त्वं। सप्तम्यर्थोऽव्यवहितोत्तरवृत्तित्वं। कार्त्तिकीतिथिप्रथमावयवतानिरूपितावयवित्ववत् त्रिंशद्धोरा

ग्रनिरूपितअव्यवहितोत्तरकालवृत्तित्ववान्ग्राम इति बोधः। अस्मादिति। अन्यशब्देन भेदवदर्थकयावत्शब्दग्रहणं बुद्धित्वर्थः। भिन्नो
शब्दयोगेतु ध्रुवमपायेऽपादानेनैव सिद्धेः। तेना यायश्शब्देन भेदस्याविग्रहणादिति वदन्ति। अस्मो भिन्न इति। पंचम्य
र्थः। स्वनिष्ठप्रतियोगिता निरूपकत्वं तन्निष्ठप्रतियोगिता निरूपितवानित्यर्थः। आराद्वनात्। आराच्छब्दो
दूरत्ववद्देशवृत्तित्ववत्सामीप्यवत्देशवृत्तित्ववदर्थकः। पंचम्यर्थो निरूपितत्वं। वनानिरूपितसामीप्यव
द्देशवृत्तित्ववान्ग्रामः। वननिरूपितदूरत्ववद्देशवृत्तित्ववान्ग्रामः। वननिरूपितदूरत्ववत्देशवृत्तित्व
वान्ग्रामः। वननिरूपितदूरत्ववत्देशवृत्तित्ववान्ग्राम इति बोधः। अन्तराशब्दयोगेऽभावः। पंचम्यर्थः स्वनि
ष्ठप्रतियोगिता निरूपकत्वं। कुलशब्दसन्निकर्षः। कुलभावके निष्ठप्रतियोगिता निरूपकोऽप्यावलसन्नि
हितोऽस्य इति बोधः। शब्दाहरणम् अमलोपी समासेन दिग्वाचकलोपलक्षितशब्दलाभार्थं। तेना
पंचमी। चैत्रात्पूर्वः फाल्गुनः। प्रतियोगितद्ध्वंसानधिकरणकालभावः शब्दार्थः। पंचम

फा१

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योभिरः। येन भिन्नप्रतियोगितानाधिकरणकालाभावाभिन्नः फाल्गुन इति बोधः। भवात्सम्भनीति। कालघटि-
तसमाप्तिकालघटितवृत्तित्वसमाप्तिश्वसमभिव्याहृतपदार्थस्यैव गम्यते। एवञ्च यथेविधिकरणत्वं।
भवति रूपिताधिकरणत्ववत्कालघटितभवसमाप्तिकालघटितकालवृत्तित्ववद्व्यापारजन्यप्रीति-
आश्रयकर्माभिन्नो हरिरिति बोधः। मामाद्वहेरिति। समभिव्याहृतपदानाधिकरणतत्वे निहितोऽद्-
रः। तद्वतिबोधः। अपवर्गे। अपहरेः परिहरेः संसारः। एतौ भवावार्थौ। एवञ्च प्रेस्वानद्धःप्रतियोगि-
ता निरूपकत्वं। हरिश्च कृताऽक्लिपरः। हरिश्च कृत्निष्ठप्रतियोगितानिरूपकाभावप्रतियोगित्ववान् (
संसार इति बोधः। आङ् मर्यादावचने। मर्यादाभिविधिद्योतक आङ् कर्मप्रवचनीयसंज्ञः स्यात्। आ-
आमर्यादाभिविध्योः कालिदासेपाकौ चेति। तत्राद्यास्ववध्यन्तरकालस्थाभावाधिकरणकाल ३२
भावसमभिव्याहृतपदार्थानाधिकरणत्वरूपा। द्वितीया त्ववध्यविधाभिविधिद्योतक

त्वंतद्योतकस्य कर्मप्रवचनीयसंज्ञातयोगेऽस्य माराापंचम्याः मर्यादाभिविध्योर्थः। आमुक्तेः संसारः। पं
चम्यर्थः स्वस्वत्वोत्तरस्वस्य निरूपकतया संसारेऽन्वयः। मुक्तिकालरूपकः संसार इति बोधः। आ
सकलाद्ब्रह्म। सकलनिरूपितव्यापकं प्रतिसादृश्ययोः किंचित्वस्तगतस्याकरणात् द्वस्तुसम्बन्धस्व
वस्तुनिष्ठस्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापारद्योतकः। कर्मप्रवचनीयाद्युपर्थः।
प्रतिनिधिप्रति। यन्निरूपितसादृश्यं प्रतिदानयत्किंचिद्गतत्वांत बोधकशब्दात्पंचमी। प्रद्युम्नः कृ
ष्णात्प्रति। कृष्णनिरूपितसादृश्यवान्प्रद्युम्न इति बोधः। तिलेभ्यः प्रतियच्छति। तिलनिष्ठस्व
स्वत्वोत्पत्तिकरमाषाभिन्नकर्मनिष्ठस्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापारः।
कर्तृनिष्ठ इति बोधः। अकर्तर्यृणे। शताद्बद्धः। शतभिन्नस्तु प्रयोज्यव्यापारजन्यो इति प्रबंधा
श्रयकर्मभिन्नो देवदत्त इति बोधः। शतेनबंधितेति। अत्र शतस्य कर्तृत्वान्न पंचमी। घ्रा

ता। भिन्नकर्तृनिष्ठव्यापारजन्यफलवत्ता। भिन्नकर्तृनिष्ठव्यापारजन्यगतिवं धामाश्रयकर्म। भिन्नो यश्चैत्रस्तद्वृत्तिर्बोधः।
विभागाश्रया। आज्ञयेन वक्तुः। आज्ञया। भिन्नहेतुप्रयोज्यशरीरस्वेच्छाभावानुकूलव्यापाराश्रयवक्तृत्वर्थः। धूमा
दग्निमान्। वह्निज्ञानं परं पंचम्यर्थस्य ज्ञाने त्वयः। धूमाभिन्नहेतुजन्यवह्निज्ञानमित्यर्थः। पृथग्विना।
पृथक्शब्दस्य भेदोऽर्थः। पंचम्यर्थः स्वनिष्ठप्रतियोगितानिरूपकत्वं। रामानिष्ठप्रतियोगितानिरूपि
भेदवानित्यर्थः। विनानानाशब्दयोरभावोऽर्थः। रामनिष्ठप्रतियोगितानिरूपकोऽभाववानिति बोधः। करणे
च। लिंगसंख्याकारकान्वयिता विशेषणीभूतार्थप्रतिपादकस्तोकादिभ्यः करणे पंचमीत्यर्थः। इति
पञ्चमी। षष्ठी शेषे। राज्ञः पुरुषः। राजनिरूपितस्वत्ववद्भिन्नः पुरुषः इति बोधः। एतत्प्रकरणा।
ज्ञोऽविदर्थ०। अधीगर्थ०। कृञः प्रति०। रुजार्थानां०। आशिषि नाथः०। जासिनिप्रहण०। व्यवहृपणोः०। ९४
कत्वार्थे०। इत्येषु सूत्रेषु शेषषष्ठीविधायकत्वे शेषषष्ठ्याः शेषे षष्ठीत्यनेनैव सिद्धत्वात्। शेष

CC-0. In Public Domain. Digitization by eGangotri

विधानेनतात्पर्यं किं लक्ष्यस्त्री विषयेज्ञातायाषष्ठी । तत्रप्रयोजकसमासाभावस्वेत्यवधेयं । त्रिवृताद॰ । विभाषो
पद॰ । द्वितीयाचात्वेरो । अत्र शेषेषष्ठीतसंबध्यते विभाषोपसर्गदृश्येततत्साभय्यपी । इतिप्राञ्चः ॥ नव्यास्तुव्या
ख्यानान्नसंबध्यतइत्याहुः । कर्तृकर्मणोः । कृदंतवाच्यक्रियानिरूपितकर्तृकर्मत्ववतोः षष्ठीत्यर्थः ॥ कृद्व
स्यकृतिः । कृत्लाभिन्नकर्तृनिष्ठाकृतिरित्यर्थः ॥ जगतः कर्ता । जगदभिन्नकर्मनिष्ठोत्पत्त्यनुकूलो व्यापारः कर्तृभि
न्नकर्मनिष्ठइतिबोधः ॥ गुणकर्मणीवेति । कृतीतिसंबध्यते । कृदंतेसति कृदन्तव्याच्यक्रियाविशेषणफलाश्रय
चेपतिकृदंतवाच्यक्रियानिरूपितकर्मसंज्ञकत्वगुणकर्मत्वं । तस्मिन्षष्ठी । तेनाश्वस्य । अश्वाभिन्नकर्म
निष्ठसुखाभिन्नकर्मसंबंधिसंयोगानुकूलव्यापाराश्रयः कर्ता । नतुकर्तृत्वंक्रियानिरूपितंतत्वाचकश्च
घञः ततो हि प्रत्ययोतिङ्कृत्तात्रतिङंतेनयोगेनलोकेतिनिषेधः । ततश्चपरिशेषात्कृत्वयोगेस्मिन्ने
तिप्रश्नः ॥ क्तस्यचेति । कृद्योगेपच्छेदकयपठभावदक्ष्यमाणस्थलेकिंस्यादित्याह । तीक्ष्णमश्नाति
ति । कृतपूर्वीकटमिति । तद्धितांतवाच्यक्रियानिरूपितकर्तृकर्मत्ववतोर्नाभूदित्यर्थः ॥ नवक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेपिकृतं मलेलक्ष्ना पर्वीफलकं कुह्नंतरूपएव वा अप्रक्रियारूपितकर्तुं कर्मत्वे भावप्रवृत्तौ इत्यवरैवेति वाच्यं। तत्सामर्थ्यात्कृदंतमा
त्रवृत्तिशक्तिप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्तृत्वे तो: षष्ठीत्याश्रयत्वात्। अकृते कृत शब्दमात्रशक्तियत
भावान्नदोषप्रवृत्तिवोध्यं। चतुर्थीवा॥ अभिव्याप्त्वयि क्रियान्वय्यार्थी विषयक्रियान्वयिबोधकप्रातिपदिका
चतुर्थी वैस्यर्थः। प्रतिपदी। यस्य च भावेन। गोष्वित्ति। ज्ञानजन्य ज्ञानविषयत्वं सम्बन्धार्थः। सापुरुजन्यातस्थ
तद्रूपतद्धर्मविभागाश्रयाभिन्नगो निष्ठविषयतानिरूपकज्ञानजन्यजिज्ञासा विषयकलाउत्तरदृशासंयोगानु
कूलव्यापाराश्रयप्रवृत्तिबोधः॥ अहोरात्रा। यत्क्रियायाम्य: योऽपसेनाहोरात्रेषां कर्तृकेतबोधकात्सप्तमीयत्
क्रियायांयथाऽपसेनोप्रत्ययार्थे तद्बोधकान्सप्तमी वा। वृत्रयं सत्सुदस्युषु साधु घाहरसाति। स्वनिष्ठक्रियासमा
नकालीनत्वं सप्तम्यर्थः। सप्त ऋषिवृष्टिकृहिंसा अपरं स्थितं सकूल व्यापाराश्रयस्थितपदार्थ साधुनिष्ठ स्थितपञ्च
कल व्यापारसामानकालीनसाध्वभिन्नकर्तृनिष्ठसहत्वकूलोव्यापार इति बोधः॥ सत्सु तरत्सु सत्
साधुपरं तरता क्रिया महदस्त्रोपरंबोधः प्रागवत्। षष्ठीचानादरे। पश्यतिसर्वं मनुवर्तते। उनादरे १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतियन्निष्ठक्रियया क्रियांतरंलक्ष्यतेतद्वाचकात्षष्ठीसप्तम्यौविस्तरार्थः।स्मरतीति।स्वसमानाधिकरणस्वोत्तरकालीनत्वोभय
संबंधेनानाहृतविशिष्टव्रजनंधातोरित्यर्थः।सप्तम्यर्थोज्ञाप्यज्ञापकभावः।स्मरत्युत्रविषयकज्ञानजन्यज्ञानविषयः
स्वसामानाधिकरण्यस्वोत्तरकालीनत्वोभयसंबंधेनानाहृतविशिष्टव्रजनंकर्मनिष्ठइतिबोधः।अनारस्मु
पुत्रादिविषयकस्वंगच्छते।स्वामीश्वर।गवांगोष्विति।स्वनिष्ठस्वत्वनिरूपितत्वंषष्ठ्यर्थः।तस्यस्वामित्वे
न्वयः।गोनिष्ठस्वत्वनिरूपितस्वामित्ववानितिबोधः।एवमीश्वरयोगेपि।धनेनधनस्यवादायादः।
दीयमानस्यग्रहणकर्ताहिदायादः।षष्ठ्यर्थोभेदः।तस्यदत्तेऽन्वयः।आनाभिन्नह्रियमाणग्रहणक
र्तेतिबोधः।गवांगोषुवासाक्षिज्ञानवान्साक्षिशब्दार्थः।स्वनिष्ठविषयतानिरूपकत्वंषष्ठीसप्त
म्योरर्थः।गोनिष्ठविषयतानिरूपकज्ञानवानितिबोधः।प्रतिभूशब्दार्थःसाहाय्यवान्।राज्ञोराज्ञिवा
प्रतिभूः।निरूपितत्वंषष्ठीसप्तम्योरर्थः।तस्यसाहाय्येऽन्वयः।राजनिरूपितसाहाय्यवानितिबोधः।
गवांगोषुवाप्रसूतः।प्रकर्षेणास्तृतइतिप्रसूतः।उत्कर्षश्चभोगमात्रफलकत्वंतेनभोगमात्रोत्पत्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अयमोगशब्दार्थः। मोक्षं[redacted]वंध्यत्वभावमात्रफलकोऽस्याश्रय इति बोधः। आयुक्तकुशलाभ्यां। अने
कतात्पर्यं तद्देकव्यापारत्वं तदितरविषयकप्रवृत्त्यभावत्वमिति यावत्। यद्वितरविषयप्रवृत्तिशू
न्यत्वं ततः षष्ठीसप्तम्यौ। आयुक्तो हरिपूजने हरिपूजनस्य वा। षष्ठ्यर्थः हरिपूजनातिरिक्त
विषयत्वन्तस्य प्रवृत्तावन्वयः। हरिपूजनातिरिक्तविषयकव्यापारजन्यप्रवृत्त्यभावाश्रय इति
बोधः। कुशलो हरिपूजने हरिपूजनस्य वा। शक्तिमानकु[redacted]शलशब्दार्थः। हरिपूजनाति
रिक्तजन्यत्वविशिष्टजनकत्वं षष्ठीसप्तम्योरर्थः। हरिपूजनातिरिक्तजनकशक्तिमा
निति बोधः। यतश्च निर्धारणम्। जातिगुणक्रियाविशिष्टस्य स्वघटितसमुदायघट
कत्वेतरसाधृत धर्मप्रकारकज्ञानविषयीकरणं नातः षष्ठीसप्तम्यौ। षष्ठ्यर्थः स्वेत ३६

CC-0. In Public Domain. Digitization by eGangotri

रसमुदायघटकव्यावृत्तत्वं अवयवावयवविभागस्य। स्वेतरसमुदायघटकव्यावृत्तत्वे सत्यवयविभि
न्नसमुदायनिरूपितावयवत्ववान्। ब्राह्मणा॥ इति बोधः। श्रीसप्तमी॥
शुभमस्तु श्रीरस्तु॥ शुभम्भूयात्॥ ॥सम्वत् १८७५॥ मितिमार्गशीर्षशुक्ल १ रोज ६ ॥ श्रीः
स्व॰ लिखितं धर्म्मानन्देन॥ श्री सदाशिवायनमः॥ श्रीरमायनमः॥ श्रीदुर्गाजी सहाय॥॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu